# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| **कक्षा-** आचार्यः | **प्रश्नपत्रम् – 2** | **गुणाः – ७०** |
| **विषयः –** रामानुजवेदान्तः | **सत्रम्-** ०४ | **समयः-** ११.३० तः ०२.३० |
| **दिनाङ्कः –**२७-०३-२०२० | **सन्दर्भग्रन्थः –** श्रीभाष्यम् चतुर्थोऽध्यायः | |

---

### प्रथमान्वितिः (Unit 1) गुणाः

**प्रश्न १** **कस्यचिदेकस्य सूत्रस्य यथाभाष्यं व्याख्यानं विधीयताम् ।** ०५

१ आसीनः सम्भवात् ।

२ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्॥

**प्रश्न २** **आवृत्त्यधिकरणं यथाभाष्यं विवेचयत ।** १०

**अथवा**

**"मनो ब्रह्मेत्युपासीत्"," स यो नाम ब्रह्मेत्युपास्ते" इत्यादिप्रतिकोपासनेष्वपि आत्मत्वानुसन्धानं कार्यम् उत न इति यथाभाष्यं विविच्यताम् ।**

### द्वितीयान्वितिः (Unit 2)

**प्रश्न ३** **किमप्येकं सूत्रं यथाभाष्यं विवेचयत ॥** ०५

१ वाङ्मनसि दर्शनाच्छब्दाच्च ।

२ रश्म्यनुसारी ।

**प्रश्न ४** **मनोऽधिकरणं यथाभाष्यं विवेचयत ।** १०

**अथवा**

**शरीरादुत्क्रान्तस्यापि सूक्ष्मशरीरमनुवर्तते अन्यथा चन्द्रसंवादाद्यनुपपत्तिः । कथमिदमवगम्यते? इति यथाभाष्यं प्रतिपादयत ।**

### तृतीयान्वितिः (Unit 3)

**प्रश्न ५** **अधस्तनयोः सूत्रयोरेकस्य व्याख्यानं विधेयम् ।** ०५

१ अर्चिरादिना तत्प्रथितेः ।

२ तडितोऽधिवरुणः सम्बन्धात् ।

**प्रश्न ६** **किमर्चिरादयो मार्गचिह्नभूतः उत भोगभूमयः अथवा विदुषां ब्रह्म प्रेप्सितामतिवोढारः ? इति किं तावत् युक्तमिति यथाग्रन्थं विशदयत ।** १०

**अथवा**

**कार्याधिकरणं यथाभाष्यं विवेचयत ।**

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ अधस्तनयोः सूत्रयोरेकस्य व्याख्यानं विधेयम् ।** ०५

१ मुक्तः प्रतिज्ञानात् ।

२ सङ्कल्पादेव तच्छ्रुतेः ।

**प्रश्न ८** ब्राह्माधिकरणं विवेचयत । **१०**

**अथवा**

नन्वत्रात्माणुपरिमाण इत्युक्तम् कथमनेकशरीरेष्वेकस्याणोरात्माभिमानसंभवः इति यथाभाष्यं विशदयत।

**प्रश्न ९ यथाग्रन्थं दश प्रश्नाः समाधेयाः ।** १०

१ प्रथमपादे कत्यधिकरणानि सन्ति ?

२ ब्रह्मविद् किमाप्नोति ?

३ किन्नाम प्रतीकोपासनम् ?

४ आसीनाधिकरणे कति सूत्राणि सन्ति ?

५ सर्वेन्द्रियसंयुक्तं मनः कुत्र संपद्यते ?

६ उपासको विद्वान् शताधिकया कया नाड्या उत्क्रामति ?

७ विदुषो निशि मृतस्य ब्रह्मप्राप्तिरस्ति न वा ?

८ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते एकया याति किम् अन्यया किम् ?

९ श्रीभाष्यस्य रचयिता कः ?

१० किन्नाम अधिकरणम् ?

११ अर्चिपर्यायः लोकः कः ?

१२ कार्याधिकरणे कति सूत्राणि सन्ति ?

१३ जीवाः कतिविधाः के च ते ?

१४ मुक्तानां जीवानामैश्वर्यकारं कस्मिन् पादे वर्णितम् ?

१५ स्वप्नावस्थायां रथादिसृष्टेः कर्ता कः जीवात्मा उत परमात्मा ?

**************************